# Gangashtakam by Kalidas

# ગઙ્ગાષ્ટકં કાલિદાસકૃતમ્

## Document Information

Text title : gangAShTakam kAlidAsavirachitaM

File name : gangAShTakamkAlidAsa.itx

Category : aShTaka, devii, nadI, kAlidAsa, devI

Location : doc_devii

Author : Kalidas

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# Gangashtakam by Kalidas

# ગઙ્ગાષ્ટકં કાલિદાસકૃતમ્

શ્રીગણેશાય નમઃ ॥

નમસ્તેઽસ્તુ ગઙ્ગે ત્વદઙ્ગપ્રસઙ્ગાદ્ભુજં ગાસ્તુરઙ્ગાઃ કુરઙ્ગાઃ પ્લવઙ્ગાઃ ।
અનઙ્ગારિરઙ્ગાઃ સસઙ્ગાઃ શિવાઙ્ગા ભુજઙ્ગાધિપાઙ્ગીકૃતાઙ્ગા ભવન્તિ ॥ ૧॥

નમો જહ્નુકન્યે ન મન્યે ત્વદન્યૈર્નિસર્ગેન્દુચિહ્નાદિભિર્લોકભર્તુઃ ।
અતોઽહં નતોઽહં સતો ગૌરતોયે વસિષ્ઠાદિભિર્ગીયમાનાભિધેયે ॥ ૨॥

ત્વદામજ્જનાત્સજ્જનો દુર્જનો વા વિમાનૈઃ સમાનઃ સમાનૈર્હિ માનૈઃ ।
સમાયાતિ તસ્મિન્પુરારાતિલોકે પુરદ્વારસંરુદ્ધદિક્પાલલોકે ॥ ૩॥

સ્વરાવાસદમ્ભોલિદમ્ભોઽપિ રમ્ભાપરીરમ્ભસમ્ભાવનાધીરચેતાઃ ।
સમાકાઙ્ક્ષતે ત્વત્તટે વૃક્ષવાટીકુટીરે વસન્નેતુમાયુર્દિનાનિ ॥ ૪॥

ત્રિલોકસ્ય ભર્તુર્જટાજૂટબન્ધાત્સ્વસીમાન્તભાગે મનાક્પ્રસ્ખલન્તઃ ।
ભવાન્યા રુષા પ્રોઢસાપન્તભાવાત્કરેણાહતાસ્તવત્તરઙ્ગા જયન્તિ ॥ ૫॥

જલોન્મજ્જદૈરાવતોદ્દાનકુમ્ભસ્ફુરત્પ્રસ્ખલત્સાન્દ્રસિન્દૂરરાગે ।
ક્કચિત્પદ્મિનીરેણુભઙ્ગે પ્રસઙ્ગે મનઃ ખેલતાં જહ્નુકન્યાતરઙ્ગે ॥ ૬॥

ભવત્તીરવાનીરવાતોત્થધૂલીલવસ્પર્શતસ્તત્ક્ષણં ક્ષીણપાપઃ ।
જનોઽયં જગત્પાવને ત્વત્પ્રસાદાત્પદે પૌરુહૂતેઽપિ ધત્તેઽવહેલામ્ ॥ ૭॥

ત્રિસન્ધ્યાનમલ્લેખકોટીરનાનાવિધાનેકરત્નાંશુબિમ્બપ્રભાભિઃ ।
સ્ફુરત્પાદપીઠે હઠેનાષ્ટમૂર્તેર્જટાજૂટવાસે નતાઃ સ્મઃ પદં તે ॥ ૮॥

ઇદં યઃ પઠેદષ્ટકં જહ્નુપુત્ર્યાસ્ત્રિકાલં કૃતં કાલિદાસેન રમ્યમ્ ।
સમાયાસ્યતીન્દ્રાદિભિર્ગીયમાનં પદં કૈશવં શૈશવં નો લભેત્સઃ ॥ ૯॥

ઇતિ શ્રીકાલિદાસકૃતં ગઙ્ગાષ્ટકસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Dinesh Agarwal  dinesh.garghouse at gmail.com

*Gangashtakam by Kalidas*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*